# Kashyapaditikritam Vishnu Stotram

# કશ્યપાદિતિકૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Kashyapaditikritam Vishnu Stotram

File name : kashyapAditikRRitaMviShNustotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 144/64-88||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2025

*sanskritdocuments.org*

# કશ્યપાદિતિકૃતં વિષ્ણુસ્તોત્રમ્

કશ્યપોઽપિ સુતં ત્વિન્દ્રં ભ્રષ્ટરાજ્યં વિલોક્ય ચ ।
આદિત્યા સહ સૌરાષ્ટ્રે તપસ્તેપે પયોવૃતમ્ ॥ ૬૪॥

અર્ચયામાસ દેવેશં પદ્મનાભં જનાર્દનમ્ ।
શરીરે તુ તયોસ્તત્ર પિપીલિકાભિરાવૃતે ॥ ૬૫॥

તેજો મહત્તયોર્વ્યાપ્ય સૌરાષ્ટ્રે પરિતસ્તદા ।
લોકાસ્તુ વિસ્મિતાસ્તેન તૌ સ્તુવન્તિ પુનઃ પુનઃ ॥ ૬૬॥

હરિર્વર્ષસહસ્રાન્તે પ્રસન્નસ્તપસા તયોઃ ।
તત્રૈવાવિરભૂત્તસ્ય દેવ્યા સહ સનાતનઃ ॥ ૬૭॥

તં દૃષ્ટ્વા પુણ્ડરીકાક્ષં શઙ્ખચક્રગદાધરમ્ ।
ઇન્દીવરદલશ્યામં સર્વાભરણશોભિતમ્ ॥ ૬૮॥

કિરીટહારકેયૂરકુણ્ડલશૃઙ્ખલાન્વિતમ્ ।
પીતામ્બરં શ્રીવત્સાઙ્કકૌસ્તુભહારવક્ષસમ્ ॥ ૬૯॥

લક્ષ્મીયુક્તં ગરુડસ્થં પ્રસન્નં જગદીશ્વરમ્ ।
હર્ષનિર્ભરહૃદયસ્તુષ્ટાવ કશ્યપો હરિમ્ ॥ ૭૦॥

નમો નમસ્તે લક્ષ્મીશ સર્વેશ ભુવનેશ્વર ।
સ્વાશ્રિતાનાં સુખદાત્રે ભક્તકાર્યકૃતે નમઃ ॥ ૭૧॥

આદિમધ્યાન્તરહિતનિત્યરૂપાય તે નમઃ ।
નમઃ સર્વત્રાણકૃતે વેદવેદાઙ્ગચક્ષુષે ॥ ૭૨॥

સૂક્ષ્માય સ્થૂલરૂપાય નારાયણાય તે નમઃ ।
કલ્યાણગુણપૂર્ણાય પરાત્મને ચ તે નમઃ ॥ ૭૩॥

નમસ્તે યોગિગમ્યાય ભક્તેચ્છાપૂરકાય તે ।
નિત્યમુક્તૈકભોગાય પરધામેશ્વરાય ચ ॥ ૭૪॥

ચતુરાત્મન્નમસ્તુભ્યં વ્યૂહાત્મને ચ તે નમઃ ।
પઞ્ચપઞ્ચસ્વરૂપાય પઞ્ચસંસ્કારિણે નમઃ ॥ ૭૫॥

નારાયણાય કૃષ્ણાય વાસુદેવાય તે નમઃ ।
શાર્ઙ્ગિણે વિશ્વરૂપાય ધાત્રે ત્રાત્રે ચ તે નમઃ ॥ ૭૬॥

વિષ્ણવે જિષ્ણવે તુભ્યં શુદ્ધસત્ત્વાય તે નમઃ ।
બલેર્બલં મહજ્જાતં તન્નિષૂદય માધવ ॥ ૭૭॥

દેવાસ્તદા સુખિનઃ સ્યુરિતિ ચાભ્યર્થનાઽસ્તિ મે ।
યદ્યપિ બલિરાજોઽસૌ ભક્તોઽસ્તિ સુરમેલનઃ ॥ ૭૮॥

કિન્તુ સુરાતિક્રમણં માસ્તુ દૈત્યસ્ય માધવ ।
તસ્માત્ત્રિલોકગં રાજ્યં ત્વિન્દ્રસ્યૈવ સદાઽસ્તુ વૈ ॥ ૭૯॥

બલેસ્ત્વાસુરરાજ્યં ચ પાતાલાદૌ યથાસ્તુ ચ ।
તથાઽસ્ત્યભ્યર્થનીયં મે યથેચ્છસિ તથા કુરુ ॥ ૮૦॥

ઉક્ત્વા તુ કશ્યપસ્તત્ર વિરરામ હરેઃ પુરઃ ।
અદિતિઃ પ્રાહ દેવેશં નત્વા સ્તુત્વા જગત્પ્રભુમ્ ॥ ૮૧॥

હે નાથ યદિ દેવાનાં શાસ્તૃત્વં ચાસુરે ભવેત્ ।
તદાઽસ્મત્પુત્રબાહુલ્યે નાસ્તિ કિઞ્ચિત્પ્રયોજનમ્ ॥ ૮૨॥

યદિ શ઼ૃગાલાઃ કાકાશ્ચ સ્યુર્દેવસ્ય વિભૂતયઃ ।
કિં સિંહેન ચ હંસેન તદા વૈ મહિમા તવ ॥ ૮૩॥

યદિ દૈત્યાઃ સાર્વભૌમા ભ્રાતરસ્તે ચ કિઙ્કરાઃ ।
અલં તર્હિ જીવિતેન ત્વદિત્યા રમયા શ્રિયા ॥ ૮૪॥

યદિ ભવાન્મહૈશ્વર્યો દૈત્યોઽપિ તાદૃશો ભવેત્ ।
અલં ભગવતા તર્હિ દૈત્યો વૈ માધવો ભવેત્ ॥ ૮૫॥

તસ્માત્પાત્રાધિકારેણ દેયા સમૃદ્ધિર્હિ નાઽન્યથા ।
યદિ લૌહં ગલે ન્યસ્તં શોભતે રૂપભાસુરમ્ ॥ ૮૬॥

કૃતં તર્હિ સુવર્ણેન વ્યર્થસૃષ્ટં હિ હાટકમ્ ।
યદિ દૈત્યો ભવેદિન્દ્રો વ્યર્થા હ્યપ્સરસસ્તથા ॥ ૮૭॥

રાજમાતરો રાક્ષસ્યશ્ચેદિન્દ્રાણ્યા હ્યલં તદા ।
કિમ્બહૂક્તેન મે નાથ વ્યવસ્થાં કુરુ કેશવ ॥ ૮૮॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૧૪૪-અધ્યાયાન્તર્ગતં
કશ્યપ-અદિતિકૃતં વિષ્ણુસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૧૪૪/૬૪-૮૮॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 144/64-88..

Proofread by PSA Easwaran

---

*Kashyapaditikritam Vishnu Stotram*

pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*